# अथ अव्ययप्रकरणम्

**स्वरादिनिपातमव्ययम् 1/1/3711**

**स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः। स्वर्। अन्तर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायम्। चिरम्। मनाक्। ईषत्। जोषम्। तूष्णीम्। बहिस्। अवस्। समया। निकषा। स्वयम्। वृथा। नक्तम्। नञ्। हेतौ। इद्धा। अद्धा। सामि।**

**सूत्रप्रकारः** – संज्ञासूत्रमिदम्।

**पदच्छेदः** – स्वरादिनिपातम्, अव्ययम्।

**सूत्रार्थ** – स्वरादिगणपठितानि, निपातसंज्ञकपदानि च अव्ययसंज्ञकानि स्युः। स्वरादिनिपातम्, अव्ययम् इति पदच्छेदः। स्वरादिनिपातम् इति पदं संज्ञी, अव्ययम् इति संज्ञापदम्। स्वर् आदिर्येषां ते स्वरादयः। स्वरादयश्च निपाताश्च इत्यनयोः समाहारद्वन्द्वः। चादीनां पृथक् पाठस्तु स्वरभेदार्थः 'निपाता आद्युदात्ताः' इति नियमात्। अद्रव्यवाचिनां चादिगणपठितानामेव अव्ययसंज्ञा भवति। स्वरादीनां तु द्रव्यवाचिनाम्, अद्रव्यवाचिनाञ्च अव्ययसंज्ञा भवति।

**स्वरादिगणपठितशब्दानामर्थाः –**

**स्वर्** – स्वर्गः, पारलौकिकसुखविशेषः, परलोकार्थवाचकः।

**अन्तर्** – मध्ये। प्रातर् – प्रत्यूषे।

**पुनर्** – पुनः।

**सनुतर्** – अन्तर्धौ, ह्नुते, विलीयते।

**उच्चैस्** – उन्नतः, उपरि।

**नीचैस्** – अल्पः, अधोगतिः।

**शनैस्** – क्रियामान्द्ये, ऋधक् – सत्यम्, वियोगः, शीघ्रता, सामीप्यम्, लाघवम्।

**ऋते** – वर्जनम्, निषेधः, विना।

युगपत्– एकसमये। आरात् – दूरे समीपे च। पृथक् –भिन्नः। ह्यस् – अतीते दिवसे, श्वस्–अनागते दिवसे। दिवा–दिवसे। रात्रौ–निशि। सायम्–निशारम्भे। चिरम्–बहुकालं यावत्। मनाक् – किञ्चिद्। ईषत् – स्वल्पः। जोषम् – सुखम्, मौनम्। तृष्णीम्– मौनम्। बहिस्, अवस् – बहिः, समया – समीपे, मध्ये। निकषा– समीपे स्वयम् – स्वार्थे। वृथा – व्यर्थः। नक्तम् – रात्रिः। नञ् – निषेधः, तत्सदृशः, अभावः, तद्भिन्नः, अल्पः, अप्रसिद्धः, विरोधश्च।

**तत्सादृश्यमभावश्च तादन्यत्वं तदल्पता।**
**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।**

हेतौ – निमित्ते। इद्धा – प्रकाशः, स्पष्टः। अद्धा – स्पष्टः, अवधारणम्, निश्चयः, तत्वकथनम्, अतिशयः। सामि – अर्धः, निन्दितः।

**वाक्यप्रयोगः –**

(१) युधिष्ठिरः स्वरगच्छत् (२) विद्यालयस्य अन्तः छात्राः सन्ति। (३) सः प्रातः स्नानं करोति। (४) सः पुनः वदति। (५) देवः सनुतः अभूत्। (६) पर्वतः हिमालयः उच्चैरस्ति। (७) नदी इतः नीचैः वहति। (८) पीनः छात्रः शनैः धावति। (९) ज्ञानात् ऋते न सुखम्। (१०) एतद्वचः ऋधक् अत्र कथने ऋधक्। अयं मार्गः अस्मात् मार्गात् ऋधक्। (११) रामः लक्ष्मणश्च युगपत् वनम् अगच्छताम् (१२) ग्रामात् वनम् आरात्, नदी च आरात् अस्ति। (१३) ताम्रात् स्वर्णं पृथक् वस्तु। (१४) ह्यःसः जयपुरमगात्। (१५) श्वः रामः अत्रागमिष्यति। (१६) उलूकः रात्रौ पश्यति। (१७) सः सायं पर्यटति। (१८) श्रमिकः चिरं कार्यमकरोत्। (१९) अस्मिन् विषये मनाक् अपि सन्देहो नास्ति। (२०) सः जोषमनुभवति सः जोषमस्ति। (२१) तृष्णीम् भव, बहु वदसि। (२२) विद्यालयात्

बहिः (अवः) राजमार्गः अस्ति। (२३) त्वां मां समया कोऽस्ति। ग्रामं समया कूपः अस्ति। (२४) जयपुरं निकषा बहूनि उद्योगक्षेत्राणि सन्ति। (२५) सः स्वयं कार्यं विदधाति। (२६) वृथा कालं न यापय। (२७) अयं छात्रः नक्तं पठति, प्रातः स्वपिति। (२८) कार्यं त्वया न कर्तव्यम्। सः रामः नास्ति। अनुदरा इयं कन्या। त्वं न ब्राह्मणोऽसि। सः असुरो वर्तते। नायं ब्राह्मणवत्। अत्र घटो नास्ति। (२९) अयं छात्रः अद्धा उक्तवान्। अस्ति मम अद्धा। (३०) चौरः सामि भवति। इदं वस्तु सामि एव अस्ति।

**वत् ( ग.4 ) ब्राह्मणवत्। क्षत्रियवत्। सना। सनत्। सनात्। उपधा। तिरस्। अन्तरा। अन्तरेण। ज्योक्। कम्। शम्। सहसा। विना। नाना। स्वस्ति। स्वधा। अलम्। वषट्। श्रौषट्। वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो, भिस्। प्रायस्। मुहुस्। प्रबाहुकम्। प्रवाहिका। आर्यहलम्। अभीक्ष्णम्। साकम्। सार्धम्। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशाम्। प्रतान्। मा। माङ्। आकृतिगणोदयम्। इति स्वरादयः।**

**व्याख्या** – वत् प्रत्ययान्तम् अव्ययसञ्ज्ञकं भवति। वत्प्रत्ययेनेह 'तेन तुल्यं क्रिया चेद्वतिः' 'तत्र तस्येव' 'तदर्हम्' इत्येतैः सूत्रैः विहित वतिप्रत्ययस्य ग्रहणं भवति। तद्धितश्चासर्वविभक्तिः इत्यनेन सूत्रेणैव। अव्ययसंज्ञा सिध्यति। अतः स्वरादिगणे वत्प्रत्ययस्य पाठः व्यर्थ इति। केवलप्रत्ययस्य अव्ययसंज्ञाप्रयोजनाभावात्।

**अर्थः, वाक्यप्रयोगश्च –**

ब्राह्मणवत्–ब्राह्मणसदृशः। अयं क्षत्रियः ब्राह्मणवत्। क्षत्रियवत्–क्षत्रियसदृश अयं ब्राह्मणः क्षत्रियवत्। सना, सनत्, सनात्–नित्यम्। वेदाः सना–सनत् सनात् वा सन्ति। उपधा–भेदः। कास्ति अनयोः उपधा। तिरस्–अन्तर्धौ। सिंहः तिरोऽभवत्। अन्तरा–मध्ये, विना। त्वां माम् अन्तरा गृहमस्ति। अन्तरेण–वर्जने। विद्यामन्तरा अन्तरेण वा न सुखम्। ज्योक्–समयाधिक्यम्, प्रश्नः, शीघ्रम्, सम्प्रति। ज्योक् गच्छतु। अस्मिन् कार्ये ज्योक् न कर्तव्यम्। कम्–जलम्, मूर्धा, निन्दा, सुखम्। कं स्वीकरोतु, कमनुभवामि। सः तव कं करोति।

शम्–सुखम्। भवान् शमनुभवतु। सहसा–आकस्मिकम्। सहसा कार्यं न कुर्वीत। विना–वर्जनम्। नाना–अनेके, निष्फलम्, वर्जनम्, विना। जलं विना, नाना जीवनम्। नाना नारीं निष्फला लोकयात्रा।

स्वस्ति–कल्याणम्, मङ्गलम्। स्वस्ति ते भूयात्। स्वधा–पितृभ्यः हविर्दानम् इदमन्नं पितृभ्यः स्वधा। अलम्–भूषणे पर्याप्त्यर्थे, शक्त्यर्थे, वारणे निषेधे च अलं श्रमेण। सा आत्मानमलङ्करोति। अलं विवादेन। हरिः दैत्येभ्यः अलम्। वषट्, श्रौषट्, वौषट् – देवेभ्यः हविर्दाने। इन्द्राय वषट्, श्रौषट्, वौषट्। अन्यत्–भिन्नम्। एतद् अन्यत् वस्तु अस्ति। अस्ति–सत्तायाम्। इयम् गौः अस्तिक्षीरा। उपांशु–अस्पष्टोच्चारणे मनसोच्चारणे एकान्ते च। इदमुपांशुकथनम्। उपांशु जपति। क्षमा–क्षान्तिः। वीरस्य भूषणं क्षमा। विहायसा–आकाशे सः विहायसा गच्छति। दोषा–रात्रिः। दिनम् दोषा इव भाति। मृषा–मिथ्या=असत्यम्। अयं दुर्जनः मृषा मिथ्या वा वदति। मुधा–व्यर्थम्। मुधा तव जल्पितम्। पुरा––प्राचीनकाले, आसन्नभविष्ये वा। पुरा अहमवोचम् पुरा अहं वक्ष्यामि। मिथः मिथो – एकान्ते, परस्परे वा। मिथः मिथो वा सम्बन्धस्तयोरस्ति। प्रायस्–बाहुल्येन। अयं प्रायः हसत्येव। मुहुस्–पौनःपुन्येन, वारम्वारम्। शिशुः मुहुः क्रन्दति। प्रवाहुकम्–समानकाले ऊर्ध्वे चाऽर्थे। प्रवाहुकम् सः अवोचत्। आर्यहलम्–बलपूर्वकम्। सः आर्यहलं कार्यं कृतवान्। अभीक्ष्णम्– पुनः पुनः। अभीक्ष्णं शब्दं वद। साकम्–सार्धम्–सह। पित्रा साकं सार्धं वा गच्छति पुत्रः। नमस्–नमस्कारः। देवाय नमः हिरुक्–वर्जनम्, निषेधः। एतत्कार्यं हिरुक्। धिक्–निन्दा, भर्त्सना। दुर्जनं त्वां धिक्।

अम्–शीघ्रम्, अल्पम्। एतद् वस्तु अम् अस्ति। अम् कार्यं निष्पादयतु। आम्=अङ्गीकरणम्। आम्, वदतु भवान्। प्रताम्–ग्लानिः। सः प्रतामनुभवति। प्रशाम्–शमनार्थे। सः सन्तापं प्रशाम्यति। प्रताम्=विस्तारः। पटं प्रतान् करोतु मा माङ्=निषेधः। कार्यं मा करोतु। कार्यं मा कार्षीः। आकृतिगणोऽयम् – स्वरादिगणः आकृतिगणोऽस्ति।

आकृत्या स्वरूपेण गण्यते। तदनन्तरम् अन्येऽपि शब्दाः स्वरादिगणे बोध्याः। यथा – कामम् –स्वतन्त्रता, स्वच्छन्दता। प्रकामम्–अतिशये। साचि–तिर्यक्, वर्तुलम्। सत्यम्–अर्धस्वीकृति। मङ्क्षु–आशु–शीघ्रता। संवत्–वर्षे। अवश्यम्–निश्चितम्। सपदि–शीघ्रम्। बलवत्–अतिशयः। प्रादुस्–आविस्=प्रकटीकरणम्। अनिशम्–नित्यम्, सदा, अजस्रम् सन्ततम्–निरन्तरार्थे प्रयुज्यन्ते। उषा–रात्रिः। रोदसी–द्युलोक, पृथिवी, ओम्–स्वीकरणम्, ब्रह्म। अ+उ+म् – ब्रह्मविष्णुशिववाचकः ब्रह्मरूपी। अव+मनिन् टिलोप=ओम् इत्यस्य अर्थः 'ब्रह्म' इत्यस्ति।

भूः=पृथिवी। भुवः=अन्तरिक्षः। झटिति, प्राक्, तरसा=शीघ्रता, सुष्ठु–प्रशंसायाम्। दुष्ठु=निष्कृष्टः। सु=पूजार्थकम्। आः=आश्चर्ये। कु–कुत्सिते, ईषदर्थे। अञ्जसा–तत्वे, शीघ्रे। मिथु=युगलम्। अस्तम्–विनाशः, स्थाने–युक्ते, ताजक्–शीघ्रता, चिराय–चिररात्राय चिरस्य–चिरेण–चिरात्–चिरम्=दीर्घकालार्थे। वरम्–किञ्चित् श्रेष्ठार्थे आनुषक्–क्रमशः सन्निवेशः, आनुपूर्वी। अनुषक्=अनुमाने। अमेनः=शीघ्रम्, साम्प्रतिकम्। सुदि=शुक्लपक्षः वदि=कृष्णपक्षः।

**च। वा। ह। अह। एव। नूनम्। शश्वत्। युगपत्। भूयस्। कूपत्। सूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। किञ्चित्। यत्र। नह। हन्त। माकिः। माकिम्। नकिः। ( आकिम्/नाकिम् ) माङ्। नञ्। यावत्। ताव्। त्वै। द्वै। न्वै। रै। श्रौषट्। वौषट्। स्वाहा। स्वधा। वष्ट्। तुम्। तथाहि। खलु। किल। अथो। अथ। सुष्ठु। स्म। आदह।**

**अर्थः वाक्यप्रयोगश्च –**

चादिगणपठित अव्ययसञ्ज्ञकाः पठ्यते –

च=समुच्चयः, अन्वाचयः,इतरेतरयोगः, समाहारः।

परस्परनिरपेक्षितानामनेकेषां पदानामेकस्मिन् क्रियापदे अन्वयः समुच्चयः भवति। यथा–ईश्वरं गुरुं च भजस्व।

यत्र एकस्य पदस्य एकस्मिन् क्रियापदे परार्थप्रवृत्तये अन्वयो भवति, अपरस्य पदस्य अन्यस्मिन् क्रियापदे उद्देश्यभावेन अन्वयः अन्वाचय इत्युच्यते। यथा – भिक्षाम् अट गां च आनय।

परस्परापेक्षितपदानामेकस्मिन् क्रियापदे अन्वयः इतरेतरयोगः भवति। यथा – हरिहरौ पूजय।

समाहारः – समूहः। यथा – व्याकरणे प्रथमं संज्ञा परिभाषम् अधीष्व। वा–विकल्पः, उपमा, इवार्थे, समुच्चयः।अश्वं गजं वाऽनय। गजो वा दृष्टः। चन्द्रो वा मुखम्। ह–प्रसिद्धिः। रामः ह राजा आसीत्। अह–अद्भुतः, कष्टम्, पूजार्थे। अह अस्ति एतत्। अह स मृतः। देव अह अस्ति। एव – उक्तपरामर्शः। एवं स आह। नूनम् – निश्चयः, तर्कः। नूनं स छात्रः। नूनं तत् सत्यम्। शश्वत्–पौनःपुन्येन, नित्यम्, सहार्थः। शश्वत् पुस्तकं पठति बालः। युगपत् – एकस्मिन् काले, एकीभूय। युगपत् छात्राः ब्रुवन्ति। भूयस्–पुनरर्थे, आधिक्ये च। भूयो ब्रवीति सः। कूपत् – प्रश्ने, प्रशंसायाम्। अस्ति इदं पुस्तकं कूपत्। कुवित्–भूर्यर्थे, प्रशंसायाम्। विद्याधनं कुवित्। नेत्–शङ्कायां प्रतिषेधविचारसमुच्चयेषु च। वृक्षं नेत् विनाश्यम्। चेत्–यदि। ज्ञानमस्ति चेत् पूज्यः सः। चण् – यदि। अस्ति चण् धनं पुस्तकं क्रीणीहि। णानुबन्धस्तु– निपातैर्यदिहन्तकुविन्नेच्चेच्चण् –इति विशेषणार्थः। समुच्चयादौ तु यत्र अनवधारणम्, अमर्षः गर्हा, आश्चर्यम्। नावकल्पयामि, न मर्षये, आश्चर्यं वा यत्र भवान् वृषलं याजयेत्। नह–प्रत्यारम्भे, निषेधार्थे च। कार्यं नह विधेयम्। हन्त– हर्षे विषादे अनुकम्पायां वाक्यारम्भे च। हन्त आगतः पुत्रः। हन्त मृतः पालितः पशुः। हन्त गन्तव्यम् अनेन। माकिः, माकिम्, नकिः–वर्जने, निषेधे च। कस्यापि निन्दां माकिः, माकिम्, नकिः करोतु। माङ् नञ् –न, निषेधे अकर्तव्यम् मा कर्त्तव्यम्। यावत् – तावत् = साकल्यावधिमानावधारणेषु साकल्ये – यावत्कार्यं तावत्कृतम्। अवधौ – यावट्गन्तव्यं तावत्तिष्ठ। माने – यावद्दत्तं तावद् भुक्तम्। अवधारणे – यावदमत्रं तावद् ब्राह्मणान् आमन्त्रयस्व। त्वै – विशेषवितर्कयोः, द्वै = वितर्के। पञ्च छात्राः त्वै द्वै वा सन्ति। न्वै–वितर्के (पाठान्तरम्)। रै–दाने, अनादरे च। गृहाण रै। गच्छ रै। श्रौषट्, वौषट, वषट्, स्वाहा–देवेभ्यः हविर्दाने। श्रौषडादीनामनेकाचामुभयत्र पाठः स्वरभेदार्थः। वषडिन्द्राय, अग्नये स्वाहा। स्वधा–पितृभ्यः हविर्दाने।

पितृभ्यः स्वधा। तुम्–तुङ्कारे। गुरुं तुं कृत्य हुं कृत्य वदति। करोषि तुं कार्यम्। तथाहि – निदर्शने अर्थे। तथाहि आचार्यः उक्तवान्। खलु – निषेधवाक्यालंकारनिश्चयेषु। अयमुक्तवान् खलु। खलु इदं वक्तव्यम्? किल – वार्तायाम्, अलीके च। सुप्तोऽहं किल विललाप। किमपि वदति किल। अथो अथ – मङ्गलानन्तरारम्भप्रश्नकात्स्न्याधिकारप्रतिज्ञासमुच्चयेषु। अथ शब्दानुशासनम्। अथ स आह। अथ स्नपयामासा। अथातो धर्मजिज्ञासा। अयं स्वरादावपि। तेन मङ्गलवाचकस्य सत्वार्थत्वेऽप्यव्ययत्वं सिध्यति। अत एव श्रीहर्षः –

**उदस्य कुम्भीरथ शातकुम्भजाश्चतुष्कचारुत्विषि वेदिकोदरे।**
**यथाकुलाचारमथावनीन्द्रजां पुरन्ध्रिवर्गः स्नपयाम्बभूव ताम्।। इति।**

अत्र हि अथ स्नपयां बभूव इत्यस्य मंगलस्नपनं चकारेत्यर्थः। निपातस्तु स्वरूपेणैव मंगलं मृदङ्गध्वनिवत्। सुष्ठु–स्वरभेदार्थः पाठः। प्रशंसायाम्। स्म–अतीते, पादपूरणे च। सः गच्छति स्म। आदह – उपक्रमहिंसाकुत्स्नेषु। 'आदह स्वधामन्वित्यत्र तु पदकारा आदिति पृथक् पदं पठन्ति।

**उपसर्गविभक्तिस्वरप्रतिरूपकाश्च ( ग.१६ ) अवदत्तम्। अहंयुः। अस्तिक्षीरा। अ। आ। इ। ई। उ। ऊ। ए। ऐ। ओ। औ। पशु। शुकम्। यथा कथा च। पाट्। प्याट्। अङ्ग। है। हे। भोः। अये। द्य। विषु। एकपदे। युत्। आतः। चादिरप्याकृतिबाणः। इति चादयः।**

चादिगणे 'उपसर्गविभक्तिस्वरप्रतिरूपकाश्च' इति सूत्रं पठितमस्ति। उपसर्गश्च विभक्तिश्च स्वरश्चेति उपसर्गविभक्तिस्वराः, तेषां प्रतिरूपकाः – सदृशाः समानाः इति द्वन्द्वः तत्पुरुषश्च। द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाणः शब्दः प्रत्येकम् अभिसम्बध्यते इति नियमात् प्रतिरूपकेति पदस्य उपसर्गेण विभक्त्या स्वरेण च पदेन अन्वयो भवति। अतः सूत्रार्थो भवति – उपसर्गसदृशः, विभक्तिसदृशः, स्वरसदृशश्च शब्दः अव्ययसञ्ज्ञकः भवति।

उपसर्गसदृशस्योदाहरणम् – अवदत्तम् – इति प्रयोगे अव+दा+क्त इत्यत्र अव उपसर्गः, नास्ति अपितु उपसर्गप्रतिरूपकः निपातः वर्तते। अत उपसर्गाभावे 'अच उपसर्गात्त' इति सूत्रेण दा स्थाने 'त्' आदेशो न भवति। अन्यथा 'दा' इत्यस्य तादेशे 'अवत्तम्' इति रूपं सिद्ध्यति। वाक्यप्रयोगः – धनमस्मै अवदत्तमस्ति।

ध्यातव्यः –

**अवदत्तं विदत्तं च प्रदत्तञ्चादिकर्मणि।**
**सुदत्तमनुदत्तञ्च निदत्तमिति चेष्यते।। ( महाभाष्ये )**

अत्र अनु, प्र, सु, वि, नि इत्येते उपसर्गप्रतिरूपकाः निपाताः सन्ति। विभक्तिप्रतिरूपकः यथा – अहंयुः = अहङ्कारवान्।

अहम् (अहङ्कारः) अस्त्यस्येति। अहंयुः इत्यत्र अहम् शब्दः अस्मद् शब्दस्य प्रथमैकवचनान्तः प्रतीयते किन्त्वत्र अहम् इति अव्ययेन मत्वर्थे 'अहं शुभयोर्युस्' इति सूत्रेण युस् प्रत्यये सिध्यति। पदत्वात् 'मोऽनुस्वारः' इति सूत्रेण मस्य अनुस्वारो भवति। अहंयुः शब्दे यदि 'अस्मद्' शब्दः स्वीक्रियेत तदा 'प्रत्ययोत्तरपदयोश्च' इत्यनेन मपर्यन्तस्य मदादेशे 'मद्युः' इत्यनिष्टं रूपं सिध्येत।

**वाक्यप्रयोगः –** अयं जनः अहंयुरस्ति।

**ध्यातव्यः –** शुभमस्ति अस्येति 'शुभंयुः' इति भवति। चिरेण, चिराय, चिरात्, चिरे, चिरस्य इत्यादीनि अव्ययपदान्यपि विभक्तिप्रतिरूपकाव्ययपदान्येव सन्ति न तु सुब्विभक्तयान्यतानि इति।

तिङन्तप्रतिरूपकनिपातस्योदाहरणम्– अस्तिक्षीरा=क्षीरवती गौः। अस्ति क्षीरं यस्याः इति विग्रहे बहुव्रीहिसमासः। 'अस्ति' इति क्रियावाचकं तिङ्विभक्त्यन्तं पदं नास्ति। अपितु विद्यमानार्थकं तिङन्तप्रतिरूपकमव्ययपदं वर्तते। तिङन्तत्वे सुबन्तेन क्षीरशब्देन 'अनेकमन्यपदार्थे' इति सूत्रेण समासः न सिध्यति। वाक्यप्रयोगः – इयं कृष्णा गौः अस्तिक्षीरा वर्तते।

स्वरप्रतिरूपक: यथा –

अ=सम्बोधने। अ देवदत्त अहं वदामि। अ–निन्दायामपि यथा – अपचसि जाल्म। आ–वाक्यस्मरणयो:। आ एवं नु मन्यसे। आ एवं किल तत् इ–सम्बोधने, जुगुप्सायाम् विस्मये च अर्थे। ई ईश। इ इन्द्रं पश्य। इ किं कृतम्। इ हन्ति तम्। ई उ ऊ ए ऐ औ औ इति सप्तस्वरा: सम्बोधनार्थस्य द्योतका:। पशु–सम्यक्। इदं हवि: पशु। शुकम्– शीघ्रता शुकं कार्यं कुरु। शुकं गच्छति। यथा कथा च – अनादरे। यथा कथा च अत्र उषितवान्। पाट् प्याट् – सम्बोधने। पाट् पान्थ, प्याट् पावक। अङ्ग–सम्बोधने। है राम! पाहि माम्। हे राम! किं करोषि। भो:! कस्त्वम्। अये! सम्यक् पठ। घ–पादपूर्वौ, हिंसायाम्, प्रातिलोम्ये च। स: घ निर्दिशति। विषु–साम्ये, नानार्थे च– विषु (साम्यम्) अस्त्यस्येति विषुवान्। विषुगोत्रा: ब्राह्मणा: सन्ति। एकपदे – अकस्मात्। एकपदे सर्वं कार्यं सिद्धमभूत्। युत् – निन्दायाम्। युत् करोषि एतत्कार्यम्। आत:– इतोऽपि। आत: आगच्छेत् भवान्।

चादिरप्याकृतिगण: – चादिरपि आकृत्या (स्वरूपेण) अवगन्तव्य:। अत: अन्येषां तत्सदृशानाम् अव्ययानाम् अपि ग्रहणं भवति। यथा – यत् तत् – हेत्वर्थे। यद्धनं तद्दीयताम्। आहोस्वित् – विकल्पेऽर्थे पठ आहोस्वित् गच्छ। सम्–सर्वतोभावे। कम्–पादपूर्तौ। सुकम् अतिशये। अनु–वितर्के। शम्वत्–अन्त:करणे, साम्मुख्ये। व–इवार्थे, पादपूरणे च। चटु, चाटु–प्रियवाक्ये। अयं करोति चाटुकारिताम्। वदत्ययं चटु। हुम्–भर्त्सनायाम्। इव–सादृश्ये। चन्द्र इवास्ति मुखम्। अद्यत्वे –अस्मिन् समये। अद्यत्वे बहूनि कार्याणि कुर्म:।

**ध्यातव्य: –** अस्मिन् चादिगणे अन्येऽपि अव्ययप्रयोगा: दृश्यन्ते यथा – अयि, रे, अरे, अरेरे, भोस्, हा अहह, अहो इत्यादय:।

**तद्धितश्चासर्वविभक्तिः – १/१/३८।। यस्मात् सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्। परिगणनं कर्तव्यम्। तसिलादयः प्राक्पाशपः, शस्प्रभृतयः प्राक्समासान्तेभ्यः। अम्। आम्। कृत्वोऽर्थाः। तसिवती। नानाञाविति। तेनेह न। पचतिकल्पम्। पचतिरूपम्।**

**पदच्छेद: –** अव्ययसञ्ज्ञासूत्रमस्ति। 'तद्धित: च', असर्वविभक्ति: इति पदच्छेद:। 'स्वरादिनिपातमव्ययम्' इति सूत्रात् 'अव्ययम्' इति पदमनुवर्तते। अत: सूत्रस्यार्थो भवति –

**सूत्रार्थ: –** 'यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्।'

**व्याख्या –**च – इत्यव्ययपदम्। असर्वविभक्ति: – नोत्पद्यन्ते सर्वावचनत्रयात्मिका विभक्तयो यस्मात् सोऽसर्वविभक्ति:, बहुव्रीहिसमास:। किं त्वेकवचनमेव उत्पद्यते इति भाव:। परिगणनं कर्तव्यम्। (क) तद्धितप्रकरणे 'पञ्चम्यास्तसिल्' (५.३.७) सूत्रत: प्रारभ्य याप्ये पाशप् (५.३.३७) इत्यत: प्राक् अर्थात् 'द्वित्र्योश्च धमुञ्' इति पर्यन्तम्। शस्प्रभृतय: प्राक्समासान्तेभ्य: बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्' इत्यारभ्य अव्यक्तानुकरणस्यात् इतौ इति सूत्रपर्यन्तम् समासान्तेभ्य: प्राक्। अम् – 'अमुं च च्छन्दसि' इत्यनेन विहित: अम्प्रत्ययान्त:। आम् – किमेतिङव्ययद्यादाम्बद्रव्यप्रकर्षे' इत्यनेन विहित: आमन्त:। कृत्वोऽर्था: – संख्याया: क्रियाभ्यावृत्तिगणने कृत्वसुच्' द्वित्रिचतुर्भ्यस्सुच्' विभाषा बहोर्धाऽविप्रकृष्टकाले' इत्येभि: सूत्रै: विहित: कृत्वसुजन्त:, सुजन्त:, धान्त:, तसिवती तसिश्च, तेन तुल्यं क्रियाचेद्वति:, इत्यादि विहित: तसि वति प्रत्ययान्त: नानाञाविति – 'विनञ्भ्यां नानाञौ न सह' इत्यनेन विहित: न: नाञ् प्रत्ययान्त: असर्वविभक्तितद्धितान्ताव्ययसञ्ज्ञकानां परिगणनं कर्तव्यम्।

तेनेह न पचतिकल्पम् – पचतिरूपम् – परिगणनस्य फलमस्ति यत् पचति कल्पम्, पचतिरूपम् इत्यनयो: अव्ययसञ्ज्ञा न भवति। यद्यपि एतौ असर्वविभक्तितद्धितान्ताव्ययसंज्ञकानां परिगणनं कर्तव्यम्।

तेनेह न पचति कल्पम् – पचति रूपम् – परिगणनस्य फलमस्ति यत् पचतिकल्पम्, पचतिरूपम् इत्यनयो: अव्ययसञ्ज्ञा न भवति। यद्यपि एतौ असर्वविभक्तितद्धितान्तौ अव्ययौ स्त: तथापि परिगणनाभावे अव्ययत्वं न भवति एतयो:।

परिगणिताः तद्धितप्रत्ययाः – येषामव्ययसंज्ञा भवति –

तसिल्, त्रल्, ह, अत्, दा, र्हिल्, दानीम्, धुना, द्यस्, थाल्, थमु, धा, अस्ताति, अतसुच्, रिल्, आति, एनप्, आच्, आहि, असि, त्राद्व डाच्, ध्यमुञ्, धमुञ्, एधाच्, शस्, तसि, च्वि, साति, अम्, आम्, कृत्वसुच्, सुच्, वति, ना, नाञ्।

**वाक्यप्रयोगः –** अतोऽहं ब्रवीमि, इतो भ्रष्टस्ततो नष्टः, कुतस्त्वम् (तसिल्)। यत्र (त्रल्) धूमस्तत्र वह्निः। सदाभिमानैकधना हि मानिनः। एतर्हि (र्हिल्) किं कर्तव्यम्? इदानीम् (दानीम्) सायंकालः। अधुना यत्र सरिता पुरा तत्र स्रोतः आसीत्। सद्यः (घस्) बलहरा नारीं सद्यो बलकरं पयः। यथा (थाल्) राजा तथा प्रजा। इत्थम् (थमु) इत्थं कर्तव्यम्। एकधा (धा) परमात्मा अस्ति। इत्येतेषाम् अव्ययसंज्ञात्वात् अव्ययादाप्सुपः इति सुब्लुकि भवति।

**कृन्मेजन्तः १/१/३९।। कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात्। स्मारं-स्मारम्। जीवसे। पिबध्यै।**

**सूत्रप्रकारः** – सञ्ज्ञासूत्रम्।

कृत्, मेजन्तः इति पदच्छेदः। 'स्वरादिनिपातमव्ययम्' इति सूत्रात् 'अव्ययम्' इत्यनुवर्तते। म् च एच् च मेचौ, मेचौ अन्तौ यस्य सः मेजन्तः। केवलस्य कृतः प्रयोगः न सम्भवति अतः सञ्ज्ञाविधावपि तदन्तविधिरिति भावः।

**सूत्रार्थः** – कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात्।

**उदाहरणानि –**

**स्मारं स्मारम्** – स्मृ (चिन्तायाम्) धातोः 'आभीक्ष्ण्ये णमुल् च' इति सूत्रेण णमुल् प्रत्यये अनुबन्धलोपे 'अचो ञ्णिति' इति सूत्रेण ऋकारस्य वृद्धौ रपरत्वे च कृते स्मारम् इति जाते 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात्' स्वौजसमौट्' इति सुप्रत्यये 'कृन्मेजन्तः' इति अव्ययसञ्ज्ञायाम् 'अव्ययादाप्सुपः' इति सुब्लुकि 'नित्यं वीप्सयोः' इति सूत्रेण द्वित्वे कृते पूर्वमस्य अनुस्वारे स्मारं स्मारम् इति सिध्यति।

अन्योदाहरणानि – ध्यायं – ध्यायम्। पठितुम्। भवितुम्।

जीवसे – जीव् धातोः 'तुमर्थे सेसेनसेऽसेन्क्से-कसेन्-अध्यै-अध्यैन्-कध्यै-कध्यैन्-शध्यै-शध्यैन्-तवै-तवेङ्-तवेनः' इति सूत्रेण असे प्रत्यये जीवसे इति जाते 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् 'स्वौजसमौट्' इति सुप्रत्यये 'कृन्मेजन्तः' अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इति सुब्लुकि जीवसे इति रूपं सिद्धम्।

**पिबध्यै** – पा धातोः 'तुमर्थे सेनसे.' इत्यादि सूत्रेण शध्यै प्रत्यये 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदाम्' पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' इति सूत्रेण पररूपे पिबध्यै इति जाते प्रातिपदिकत्वात् सुप्रत्यये 'कृन्मेजन्तः' इति सूत्रेण अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इतिसूत्रेण सुब्लुकि पिबध्यै इति रूपं सिद्धम्।

**४५०. क्त्वातोसुन्कसुनः १/१/४०।। एतदन्तमव्ययं स्यात्। कृत्वा। उदेतोः। विसृपः।**

**सूत्रप्रकारः –** संज्ञासूत्रम् ।

**पदच्छेदः –** क्त्वा च तोसुन् च कसुन् च इति। 'स्वरादिनिपातम् अव्ययम्' इति सूत्रात् अव्ययम् इति पदमनुवर्तते।

**सूत्रार्थः –** क्त्वा, तोसुन् एवं कसुन् प्रत्ययान्ताः शब्दाः अव्ययसंज्ञकाः स्युः।

**व्याख्या –** प्रत्ययग्रहणे तदन्ताः ग्राह्याः' इति तदन्तग्रहणम्। 'सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इति निषेधस्तु नेह प्रवर्तते। यतोहि न केवलप्रत्ययस्य प्रयोगः भवति।

**उदाहरणानि –** कृत्वा – कृधातोः 'समानकर्तृकयोः पूर्वकाले' इति सूत्रेण क्त्वा प्रत्यये अनुबन्धलोपे कृ+त्वा इति जाते आर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति ऋकारस्य गुणे प्राप्ते 'क्ङिति च' इति सूत्रेण गुणनिषेधे 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकत्वात् सुप्रत्यये 'क्त्वातोसुन्कसुनः' इतिसूत्रेण अव्ययसञ्ज्ञायाम् 'अव्ययादाप्सुपः' इति सूत्रेण सुब्लुकि कृत्वा इति सिध्यति।

**उदेतोः** – उद् उपसर्गपूर्वकात् इण् धातोः 'भावलक्षणे स्थेण्कृञ्वदि चरिहुतमिजनिभ्यस्तोसुन्' इति सूत्रेण तोसुन्

प्रत्यये उद् इ+तोस् इति जाते 'सार्वधातुकार्धधातुकयो:' इति धातो: गुणे उदेतोस् इति जाते 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वे सुप्रत्यये उदेतोस्+सु इति जातेक 'क्त्वातोसुन्कसुन:' इति सूत्रेण अव्ययसंज्ञायाम् 'अव्ययादाप्सुप:' इति सुब्लुकि सस्य रुत्वे विसर्गे च कृते उदेतो: इति रूपं सिद्धम्।

**विसृप:** – विपूर्वकात् सृप् धातो: 'सृपितृदो: कसुन्' इति सूत्रेण कसुन् प्रत्यये अनुबन्धलोपे 'पुगन्तलघूपधस्य च' इति लघूपधगुणे 'प्राप्ते क्ङिति च' इति सूत्रेण गुणनिषेधे विसृपस् इति जाते प्रातिपदिकत्वात् सुप्रत्यये 'क्त्वातोसुन्कसुन:' इति अव्ययसञ्ज्ञायाम् 'अव्यपादाप्सुप:' इति सूत्रेण सुब्लुकि सस्य रुत्वविसर्गौ विसृप: इति रूपं सिद्धम्।

अन्योदाहरणानि– पठित्वा, गत्वा, भूत्वा, प्रवदितो:, प्रचरितो: आतृद:।

**४५१. अव्ययीभावश्च १/१/४१।। अधिहरि।**

**सूत्रप्रकार:** – सञ्ज्ञासूत्रम्।

**पदच्छेद:** – अव्ययीभाव:, च इति। 'स्वरादिनिपातमव्ययम्' इति सूत्रात् अव्ययम् इति पदमनुवर्तते।

**सूत्रार्थ:** – अव्ययीभावसमास: अव्ययसञ्ज्ञ: स्यात्।

**व्याख्या** – अव्ययीभावसे समासे प्रकृतसूत्रेण अव्ययसञ्ज्ञा भवति। च इति अव्ययपदम्।

**उदाहरणानि** – अधिहरि – 'हरौ इति' इति विग्रहे हरि ङि अधि इत्यलौकिक विग्रहे 'अव्ययं विभक्तिसमीपसमृद्धि-व्यृद्ध्यर्थाभावात्ययसम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु' इति सूत्रेण समासे 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसञ्ज्ञायाम् सुब्लुकि अधि' इत्यस्य पूर्वप्रयोगे 'अव्ययीभावश्च' इति अव्ययसञ्ज्ञायाम् पुन: प्रातिपदिकत्वात् सुप्रत्यये ''अव्ययादाप्सुप:'' इति सुब्लुकि अधिहरि इति रूपं सिद्धम्।

अन्योदाहरणानि – यथाशक्ति, सहरि, इत्यादय:।

**४५२. अव्ययादाप्सुप: २/४/८२।। अव्ययाद् विहितस्य आप: सुपश्च लुक् स्यात्। तत्र शालायाम्। अथ। विहितविशेषणत्वात् नेह–अत्युच्चैसौ। अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्ति, तथाऽपि न गौणे। आब्ग्रहणं व्यर्थमलिङ्गत्वात्।**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।**
**इति श्रुतिलिङ्गकारकसंख्याभावपरा।**

**सूत्रप्रकार:** – विधिसूत्रम्।

**पदच्छेद:** – अव्ययाद्, आप्, सुप: इति। 'ण्यक्षत्रियार्षजितो यूनि लुगणिञो:' इति सूत्रात् लुक् इति पदमनुवर्तते।

आप् च सुप् च आप्सुप्, तस्य आप्सुप:, समाहारद्वन्द्व:।

**सूत्रार्थ:** – अव्ययात् विहित: आप् (टाप्, डाप्, चाप्) इत्यस्य सुप् (सु, औ, जस् इत्यादीनाम्) लुक् स्यात्।

**उदाहरणानि** – तत्र शालायाम् – इत्यत्र 'तत्र' इति पदं 'तद्धितश्चासर्वविभक्ति:' इति सूत्रेण अव्ययसञ्ज्ञकमस्ति। 'शालायाम्' इति पदस्य विशेषणम् अस्ति। अत: स्त्रीलिङ्गपदस्य विशेषणत्वात् 'अजाद्यतष्टाप्' इति सूत्रेण टाप् प्रत्यये तत्र+टाप् शालायाम् इति जाते 'अव्ययादाप्सुप:' इति आब्लुकि तत्र शालायाम् इति सिद्धम्।

**अथ** – 'स्वरादिनिपातमव्ययम्' इति सूत्रेण 'अथ' इत्यस्य अव्ययसंज्ञायां प्रातिपदिकत्वात् सुप्रत्यये 'अव्ययादाप्सुप:' इति सुब्लुकि अथ इति रूपं सिद्धम्।

विहितविशेषान्नेह – 'अव्ययात् विहितस्य सुप: लुक्' इति विहितविशेषणत्वात् न इह – अत्युच्चैसौ इत्यत्र 'औ' इत्यस्य न लुकि। उच्चै: अतिक्रान्त: इति विग्रहे 'अत्यादय: क्रान्ताद्यर्थे द्वितीयया' इति समासे अत्युच्चैस् इति स्थिते। अधिकरणशक्तिप्रधानाव्ययवृत्तिविषये कारकं प्रधानं भवति। अत: 'अत्युच्चैस्' इत्यत्र 'उच्चैस्' इत्यपि कारकप्रधानं पदमस्ति। अत्र आगतविभक्ति: अव्ययात् विहित: नास्ति। अत: 'अव्ययादाप्सुप:' इति सूत्रेण सुब्लुकि न भवति।

यद्यपि अव्ययसंज्ञायां तदन्तविधिः भवति किन्तु 'अत्युच्चैस्' इत्यत्र 'उच्चैस्' इति अव्ययं गौणमस्ति। अतः गौणे तदन्तविधेः अभावात् अत्युच्चैस् इति अव्ययं नास्ति। यतोहि स्वरादिगणे उच्चैस् इत्येव पठितमस्ति।

आब्ग्रहणं व्यर्थमलिङ्गत्वात् –

'अव्ययादाप्सुपः' इति सूत्रे आब्ग्रहणं व्यर्थम् यतोहि अव्ययस्य लिङ्गेन सह अन्वयो न भवति। अतः अव्ययसञ्ज्ञकात् पदात् टापः प्राप्तिरेव न भवति। अतः 'तत्र' इति पदे 'टाप्' इत्यस्य अभावात् 'अव्ययादाप्सुपः' इति लुक्करणं व्यर्थम् इति।

'तद्धितश्चासर्वविभक्तिः' इति सूत्रे भाष्ये –

स्त्रीलिङ्गपुल्लिङ्गनपुंसकलिङ्गैकवचनद्विवचनबहुवचनेष्वर्थेषु यन्न व्येति (विकारं न प्राप्नोति) तदव्ययम् भवति।

अत्र प्रश्नः समुदेति यत् अव्ययेन सह लिङ्गानन्वये सदृशं त्रिषु लिङ्गेषु – इति आथर्वण श्रुत्या विरोधः भवति? तत्रोच्यते गोपथब्राह्मणे –

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।**

**सान्वयकारिकार्थः –**

त्रिषु लिङ्गेषु – पुल्लिङ्गस्त्रीलिङ्गनपुंसकेति त्रिषु लिङ्गेषु , सर्वासु विभक्तिषु, सर्वेषु वचनेषु (एकवचन-द्विवचन-बहुवचनादिषु) यत् – यः शब्दः न व्येति-विकारं न प्राप्नोति तत्-पदम् अव्ययम् – अव्ययम् इत्युच्यते।

अस्यां कारिकायां विभक्तिशब्दः कारकबोधकः अस्ति। वचनशब्दः संख्याबोधकश्चास्ति न तु प्रत्ययबोधकम्। यदि प्रत्ययबोधकत्वं स्वीक्रियेत तर्हि एकस्य ग्रहणं व्यर्थं भविष्यति।

**पंक्तिविवेचनम् –**

इति श्रुतिः लिङ्गकारकसंख्याभावपरा – अथर्ववेदसम्बद्धाश्रुतिरियम् अव्ययपदेषु लिङ्गस्य कारकस्य संख्याया अभावं निर्दिशति न तु लिङ्गेन सहान्वयम् इति। नियमोऽयं निपातेषु प्रवर्तते।

स्वरादिपठित केषाञ्चित् शब्दानां लिङ्गेन, कारकेन, संख्यया सहान्वयो भवति। स्वरादिनिपातमव्ययम् इति सूत्रे भाष्ये चादीनाम् असत्ववचनानामेवसंज्ञा भवति। स्वरादीनां तु द्रव्यवाचिनाम् (सत्ववचनानाम्) अद्रव्यवाचिनाम् (असत्ववचनानाम्) च अव्ययसंज्ञा भवति। अत एव – स्वस्ति वाचयति, स्वस्तिवाच्यः क्षीणे पुण्ये स्वः पतति, प्रातः यजते इत्यादिषु वाक्येषु अव्ययपदानां कर्मकारकेन योगः दृश्यते।

**वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।**
**आपं चैव हलन्तानां यथा वाचा निशा दिशा।।**
**व गाहः-अवगाहः पिधानम्-अपिधानम्।।**

**।। इत्यव्ययप्रकरणम्।।**

**मनोरमा** – प्रसङ्गवशात् अव्ययविषये भागुरिआचार्यप्रतिपादिता कारिकेयं निर्दिशति यत् –

**अन्वयः** – भागुरिः अवाप्योः उपसर्गयोः अल्लोपम् च एव हलन्तानाम् आपं वष्टि। यथा वाचा, निशा, दिशा (इति।

**व्याख्या** – आचार्यः भागुरिः अवाप्योः उपसर्गयोः अकारलोपम् इच्छन्ति। हलन्तानां शब्दानाम् आप् विधानमिच्छन्ति। यथा –

वाच् शब्दात् आप् = वाचा।

निश् शब्दात् आप् = निशा

दिश् = शब्दात् आप् = दिशा

वाचा, निशा, दिशा इत्यादीनि आबन्ताव्ययपदानि सन्ति।

अन्योदाहरणानि – क्षुधा, गिरा, तृषा, रुजा, मुदा इत्यादीनि।

रूपलेखनप्रकार: –

१. वगाह: –

अवपूर्वकात् गाह् धातो: 'भावे घञ् प्रत्यये अनुबन्धलोपे अवगाह: इति जाते' वष्टिभागुरिरल्लोप.' इति कारिकावार्तिकेन विकल्पेन अकारलोपे वगाह: इति रूपं सिद्धम्।

विकल्पपक्षे – अवगाह: इति रूपं भवति।

२. पिधानम् – अपि पूर्वकात् धा धातो: भावे करणे वा ल्युट् प्रत्यये अनुबन्धलोपे अपि धा यु इति जाते 'युवोरनाकौ' इति सूत्रेण यु स्थाने अनादेशे सवर्णदीर्घे प्रातिपदिकत्वे सुप्रत्यये अमादेशे अपि धानम् इति जाते 'वष्टिभागुरिल्लोपमवाप्यो:' इति कारिका वार्तिकेन विकल्पेन अकारस्य लोपे पिधानम् इति रूपं सिद्धम्।

विकल्पपक्षे अपिधानम् इति रूपं भवति।

अन्योदाहरणानि – अवतंस:, वतंस:, पिनद्धा, अपिनद्धा।

**।। इति वैयाकरणसिद्धान्तकौमुद्यामव्ययप्रकरणम् समाप्तम् ।।**

## अव्ययप्रकरणे प्रश्ना:

**(क) वस्तुनिष्ठ प्रश्ना: –**

(१) सनुतर् शब्दस्य अव्ययसञ्ज्ञा केन सूत्रेण भवति?

(क) स्वरादिनिपातमव्यम् (ख) कृन्मेजन्त:

(ग) तद्धितश्चासर्वविभक्ति: (घ) अव्ययीभावश्च

(२) क्त्वातोसुन्कसुन: इत्यस्योदाहरणमस्ति –

(क) भूय: (ख) उदेतो:

(ग) अवदत्तम् (घ) सुष्ठु

**(ख) अतिलघूत्तरात्मकप्रश्ना: –**

(१) जीवसे इत्यत्र अव्ययसञ्ज्ञा केन सूत्रेण भवति?

(२) अहंयु: इत्यस्याव्ययसञ्ज्ञा केन सूत्रेण भवति?

(३) अधिहरि इत्यत्र अव्ययसंज्ञा केन सूत्रेण भवति?

**(ग) लघूत्तरात्मकप्रश्ना: –**

(१) स्वरादिनिपातमव्ययम् इति सूत्रं व्याख्यायत।

(२) अव्ययस्य परिभाषां लिखत।

(३) वगाह: इत्यत्र अकारलोपो केन भवति?

**(घ) निबन्धात्मकप्रश्ना: –**

(१) कृन्मेजन्त: इति सूत्रं व्याख्यायत।

(२) अव्ययादाप्सुप: इति सूत्रं व्याख्यायत।

(३) निम्नलिखित प्रयोगा: साधनीया:।

प्रात:, पिबध्यै, तत्र शालायाम्, अधिहरि, पिधानम्।

(४) निम्नलिखितानाम् अव्ययपदानामर्थं विलिख्य वाक्यप्रयोग: करणीय:।

सायम्, अथ, यावत्, तावत्, खलु, भूयस्, चेत्, हे, स्वाहा।